GARHBETA COLLEGE LIBRARY
Estd.-1948

Total Pages : 4

B.A./4th Sem (H)/SANS/24(CBCS)

# 2024

## 4th Semester Examination

## SANSKRIT (Honours)

### Paper : C 8-T

### (Indian Epigraphy, Paleography and Chronology)

[CBCS]

Full Marks : 60 Time : Three Hours

*The figures in the margin indicate full marks. Candidates are required to give their answers in their own words as far as practicable.*

1. अधोलिखितेषु प्रश्नेषु दश सुरगिरा देवनागरीलिप्या समाधेयाः। 2×10=20

(क) मेहरौलिलौहस्तम्भः कस्यां नगर्यां विद्यते? कं देवमुद्दिश्य अयं स्तम्भः उत्कीर्णः?

(ख) अशोकप्रचारितसारनाथस्तम्भलेखे उल्लिखितस्य 'कोटविषबेसु' पदस्य कोऽर्थः? तस्य लेख्यस्य संभाव्यः कालः लेखनीयः।

(ग) राम-रुद्र-विष्णुपद-दिक्पाल इति शब्दचतुष्टयेन किं संख्याचतुष्टयं बोध्यव्यम्?

P.T.O.

(घ) महाकवेः कालिदासस्य उल्लेखः कस्मिन् लेख्ये वर्तते? कः आसीद् तस्य लेख्यस्य कविः ?

(ङ) भारतीयोपमहादेशे प्राप्तेषु ताम्रशासनेषु कस्यचिद् द्वयस्य उल्लेखः कार्यः।

(च) जुनागढाभिलेखे रुद्रदामा काव्यवैशारद्यहेतोः केन उपाधिना भूषितः ?

(छ) भारतवर्षे एतावत् प्राप्तेषु संस्कृतलेख्येषु आदितमः कः ? तस्य लेख्यस्य संभाव्यः कालो लेखनीयः।

(ज) Indian Epigraphy इति ग्रन्थः केन विरचितः ? ब्युलरप्रणीतस्य कस्यचिद् ग्रन्थस्य नाम प्रदीयताम्।

(झ) कस्यां तिथौ विसलदेवस्य दिल्ली–शिवालिकाभिलेखः लिखितः ? क आसीद् विसलदेवस्य पिता ?

(ञ) स्मारकाभिलेखद्वयस्य नाम्नी लिख्येताम्।

(ट) भारतवर्षे प्राप्तेषु काव्यगुणसमन्विताभिलेखेषु कस्यचिद् द्वयस्य उल्लेखः कार्यः।

(ठ) Chronogram इति शब्दस्य व्युत्पत्तिः साधनीया।

(ड) कानिंहामरचितग्रन्थद्वयस्य नाम्नी लिख्येताम्।

(ढ) जुनागढाभिलेखानुसारं रुद्रदाम्नः पिता पितामहश्च कौ आस्ताम् ?

(ण) कस्मिन् खृष्टाब्दे एशियाटिकसोसाइटि इति

प्राच्यविद्याचर्चाकेन्द्रं प्रतिष्ठितम्? ASI इति संस्थानस्य पूर्णनाम लिख्यताम्।

2. अधोलिखितेषु प्रश्नेषु कस्यचित् *चतुष्टयस्य* उत्तरं प्रदेयम् (तेषु *एकस्य* संस्कृतेन लेख्यम्)। 5×4=20

(क) प्राचीनभारतवर्षस्य ग्रन्थागारविषये कश्चिद् निबन्धो रचनीयः।

(ख) भारतीयाभिलेखचर्चायां जनफेथफुलफ्लीटमहाभागस्य अवदानम् आलोच्यताम्।

(ग) सप्रसंगं व्याख्या कार्या। 2.5+2.5

(अ) 'सुवर्णदाने संवारिता नृपतयः पृथुराघवाद्याः पुत्रो बभूव धनदान्तकतुल्य'

(आ) 'भिखु वा भिखुनि वा संघं भाखति से ओदतानि दुसानि संनंधापयिया आनावाससि'

(घ) भारतीयोपमहादेशस्य धर्मीयेतिहासनिर्माणे अभिलेखानाम् उपयोगो विचार्यताम्।

(ङ) सिद्धमातृकालिपेः वैशिष्ट्यानि लिख्यन्ताम्।

(च) अधोलिखितानां संकेतानां देवनागर्या अंकेन परिणमनं कार्यम् (अंकानां वामतो गतिरिति सूत्रमवलम्ब्य)। 1×5

(अ) इनकलाशाकवर्षे

(आ) ऋषीन्दुगुणेन्दुगणिते शाकराजहायने

P.T.O.

(इ) षट्तुण्डतुण्डानलमुनिमहीतमे शकवर्षे

(ई) पावकानलवाणभूमितमे

(उ) गोत्राग्निनगभूमाने शकराजस्य हायने

3. अधोलिखितेषु प्रश्नेषु कस्यचिद् ***द्वयस्य*** समाधानं कर्तव्यम्।

10×2=20

(क) 'स्वयमधिगतमहाक्षत्रपनाम्ना नरेन्द्रकन्यास्वयंवरानेक-माल्यप्राप्तदाम्ना' कस्मिन् लेख्ये अंशोऽयं विद्यते ? तस्मिन् लेख्ये कस्य नृपस्य प्रशस्तिः उपलब्धा ? नृपस्य समरकीर्त्तय आभिगामिकगुणाश्च वर्णनीयाः। 1+1+8

(ख) मौर्यनृपतिना अशोकेन प्रणीतस्य प्रथममुख्यानुशासनस्य गिर्णारसंस्करणस्य भाषा लिपिश्च लेखनीये। अस्य लेख्यस्य संभाव्यः कालः कः ? अस्य लेख्यस्य विषयवस्तु आलोच्य महत्वञ्च विचार्यताम्। 1+1+3+5

(ग) भारतीयलिखनकलायाः प्राचीनत्वमवलम्ब्य कश्चिद् प्रबन्धो विरचनीयः।

(घ) सोदाहरणम् उत्तरब्राह्मीलिपेः (Late Brāhmī) वैशिष्ट्यानि आलोच्यन्ताम्।